SUBJECT- SANSKRIT(H)

COURSE CODE-AHSNS202C-4

COURSE TITLE- CLASSICAL SANSKRIT LITERATUE(DRAMA)

COURSE TOPIC- SWAPNAVĀSAVADATTAM

(स्वप्नवासवदत्तम्)

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः**

**सुखमन्यद् भवेत् सर्वं दुखं न्यासस्य रक्षणम्।।(1/10)**

**उत्सः** महाकविभासेन विरचितं स्वप्नवासवदत्तमिति नाटकम्। तस्मिन्नाटके दृश्यते श्लोकऽयम्।

**प्रसङ्गः** यदा उदयनस्य मन्त्री यौगन्धरायणः पद्मावत्याः समीपे अवन्तिका-वेशधारिणीं वासवदत्तां न्यासरुपेन रक्षितुमैच्छत् , तदाकर्ण्यः काञ्चुकीयः श्लोकोऽयमुक्तम्।

**अन्वयः** अर्थः सुखं दातुं भवेत्, प्राणाः सुखं दातुं भवेत्, तपः सुखं दातुं भवेयु। अन्यत् सर्वं दातुं सुखं भवेत्,न्यासस्य रक्षणं दुःखम्।

**व्याख्या-** अर्थः नानकं, रुपकमादयः सुखं आनन्दम् भवेत्, प्राणः जीवनम् दातुं सम्प्रदानाय सुखम् उत्फुल्यम् भवेत्। तपः तपः इत्युक्ते तपस्यायाः फलं दातुं आनन्दम् भवेयुः। अन्यत् सर्वं एतानि विहाय अपरद्रव्यानि दातुं सम्प्रदानाय आनन्दम् भवेत्। न्यासस्य गच्छितालंकारादयः रक्षणं परिपालनम् दुःखम् कष्टकरम्।

**भावार्थः-** अस्मिन् विश्वे दानेन पूर्णं भवति भारतीयजनाः जानान्तीति।अस्माकं देशे दातुं शक्यते यथा-विद्या, अर्थः, तपश्चायाः फलमपि। दानवीर-कर्णः तस्य जीवनसुरक्षार्थं कवचकुण्डलमपि दत्तवान्। परन्तु यदि कस्यापि द्रव्यं परिपालनस्य द्वायित्वमासीत् तर्हि तदपोक्षया नास्ति किमपि कष्टकरम्।अतः दानेन पूण्यं न तु रक्षणेन। तदर्थमुपनिषदि उच्यते- त्यक्तेन भुञ्जिथा मा गृधः कस्यस्विद् धनम्

**वृत्तम् –** अनुष्टुपवृत्तमुपलभ्यते।